प्रवेश सं० १८१५३ — विषयः पुराणेतिहासम् — क्रम सं०

नाम चैत्रकृष्णैकादशी माहात्म्यम् (पापमोचनी) — ग्रन्थकार

पत्र सं० १-४. (भविष्योत्तर पुराणस्थम्)

श्लोक सं० — अक्षर सं० (पंक्तौ) ३६ — पंक्ति सं० (पृष्ठे) ९

आकारः ९.४" × ४.१" — लिपिः दे. ना. — आधारः का.

वि० विवरणम् पू० — 14725

पी० एस० यू० पी०—७७ एम० सी० ई०—१९५१—५० ००० — ना. ३७७८

Indira Gandhi National Centre for the Arts

महीधरसंग्रहे- ४१८

Indira Gandhi National
Centre for the Arts

सृष्टिं वि
उत्पत्तिप्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ते ह्यमी लोकाः

३१
चै·कृ
ए०
१

॥श्रीगणेशाय नमः॥युधिष्ठिर उवाच॥ ॥फाल्गुनस्यासिते पक्षे श्रुता सामर्दकी मया।चैत्रस्य कृष्णपक्षे
तु किंनामैकादशी भवेत॥१॥कृष्ण उवाच॥ ॥शृणु राजेंद्र वक्ष्यामि ह्यज्ञानपापनाशनी।पृष्टो
महोत्रवीत्पृष्टो मांधात्रा चक्रवर्तिना॥२॥मांधाता उवाच॥ ॥भगवन् श्रोतुमिच्छामि लोकानां हितं
कामयया।चैत्रस्य प्रथमे पक्षे किंनामैकादशी भवेत॥३॥को विधिः किंफलं तस्याः कथयस्व प्रसादत
तः लोमश उवाच॥ शृणुष्व राजशार्दूल कामदां सिद्धिदायिनी।कथां विचित्रां शुभदां पापघ्नीं धर्म
दायिनी॥४॥पुरा चैत्ररथोद्देशे ह्यप्सरोगणसेविते॥ वसंतसमये प्राप्ते षट्पदाकुलिते वने॥५॥
गंधर्वकन्यास्तत्रैव रमंति सह किंनरैः॥ पाकशासनमुख्याश्च क्रीडंते च दिवौकसः॥६॥नापरं सु
न
न्दरं किंचिद्वनाच्चैत्ररथाहते॥तस्मिन्वने तु मुनयस्तपंति बहुलं तपः॥७॥ सह देवैः स्म मघवा
रमते मधुमाधवे।एको मुनिवरस्तत्र मेधावीनाम नामतः॥८॥अप्सरास्तं मुनिवरं मोहनायो
एम
१

सं

पचक्रमे।मंजुघोषेति विख्याता नाम्ना सा तां तं निचिंतयति॥९॥क्रोशमात्रे स्थिता तस्य भयादाश्रमसंनिधौ।गा
यंती मधुरं साधु पीडयंती विपंचिकां॥१०॥गायंतीं तामथालोक्य पुष्पचंदनवेष्टितां।कामोपि विज
यं प्राप्य कर्णिकारैः शिवावेरं मनुस्मरन्।कृत्वा भ्रुवौ धनुः कोटी गुण
पाकाक्षी शिवभक्तं मुनीश्वरम॥१२॥तस्याः शरीरसंगो शिववैरमनुस्मरन्।कृत्वा भ्रुवौ धनुः कोटी गुण
कृत्वा कटाक्षकं॥१३॥मार्गणौ नयने कृत्वा पक्ष्मपुंखो यथाक्रमं।कुचौ कृत्वा पटकुटौ विजयायोप
स्थितः॥१४॥ मंजुघोषाभवत्तत्र कामस्येव वरूथिनी॥मेधाविनं मुनिं दृष्ट्वा सापि कामेन पीडिता॥१५
यौवनोद्भिन्नदेहोसौ मेधयापि विराजते।सितोपवीतसहितो दंडी स्मर इवापरः॥१६॥मेधावी वसते स्मै
च वनस्याश्रमे शुभे।मंजुघोषा स्थिता तत्र दृष्ट्वा तं मुनिपुंगवं॥१७॥मदनेनापि संतप्ता मंदं मंदं मगा
यत।रणद्वलयसंयुक्ता सिंजन्नूपुरमेखला॥१८॥मंजुघोषा समागम्य मुनिं दृष्ट्वा तथाविधं।हाव
भाव कटाक्षैस्तं मोहमापादयत् गता॥१९॥अथ संस्थाप्य वीणां सा सस्वजे तं मुनीश्वरम॥वल्लीव व्याकु

32
चै
ए.ल
२

लिताहंत्वा तवेगेन वेपितं॥२२वसो पि रेमे तया सार्द्धं मेधावी मुनिपुंगवः। तस्मिन्नेव वनोद्देशे हृष्टान्तर्देहे

मुत्तमं॥२०॥शीव तत्वं गतं तस्य कामतत्ववशं गतः। न निशां न दिनं सोपि रमन् जानाति कामुकः॥२१॥ वेद

लक्ष्यगतः कालो मुनेराचारलोपकः। मंजुघोषा देवलोकं गमनायोपचक्रमे॥२२॥ गच्छंती प्रत्युवाचा

थ रमंतं मुनिपुंगवं। आदेशो दीयतां ब्रह्मन् स्वधाम गमनाय मे॥२३॥ मेधाव्युवाच॥ अद्यैव त्वं समाया

ता कथं गच्छसि हे गने यावत् प्रभातः संध्या स्यात् तावत् तिष्ठ ममान्तिके।२४।इति श्रुत्वा मुनेर्वाक्यं भयभीता व

भूव सा। पुनर्हर्षयामास तमृषिं न्दपसत्तम॥२५॥ मुनेः शापभयाद्भीता वहुलान्परिवत्सरान्। वर्षा

णां पंचपंचाशन्नव मासा दिनत्रयं॥२६॥ सा रेमे मुनिना तस्य निशार्द्धमिव चाभवत्॥ सा तं पुनरुवाच

घ तस्मिन् काले गते मुनिं॥२७॥ आदेशो दीयतां ब्रह्मन् सुहृद् स्वगृहं प्रति॥ मेधाव्युवाच॥ ॥प्रात राम

ः कालो धुनैवास्ते श्रूयतां वचनं मम॥ कुर्वे संध्यां न तिया वन्नावत्त्वं वैस्थिरा भव॥२८॥ इति वाक्यं मु २

नेः श्रुत्वा भयानन्द समाकुला। स्मितं कृत्वा तु सा किंचित् प्रत्युवाच सुविस्मितं॥२९॥ अप्सरा उवाच॥ ॥किं पत्व

मार्गा विप्रेंद्र तव संध्यागताः नघ॥ मयि प्रसादं कृत्वा तु गतः कालो विचार्यतां॥३० तस्याः इति वचः श्रुत्वा

विस्मयोत्फुल्ललोचनः॥३१॥ स ध्यात्वा द्विविप्रेंद्र प्रमाणमकरोत्तदा॥ समाः सप्तपंचाशत् गता मम

तया सह॥३२॥ चुक्रोध सततं तस्ये ज्वालामालेव भूवह। नेत्राभ्यां विस्फुलिंगान्स मुंचमानो ति कोपन

::॥३३॥ कालरूपां तु तां दृष्ट्वा तपसः क्षयकारिणीं॥ दुःखार्जितं मम तपो नीतं तदनया क्षयं॥३४॥ सक्

पोष्टो मुनिस्तत्र प्रत्युवाचाकुलेंद्रियः। तां प्रशापसमेधावी त्वं पिशाची भवेति च॥३५॥ धिक् त्वां पापे दुराचारे

कुलटे पातकप्रिये। तस्य शापेन सा दग्धा विनयावनतस्थिता॥३६ प्रसादं कुरु विप्रेन्द्र शापस्यानुग्रहं कुरु

। सतां संगो हि भवति वचोभिः सप्तभिः पदैः॥३७॥ त्वया सत्तम ब्रह्मन् गता बहुवत्सराः। एतस्मात् कारणात्

स्वामिन् प्रसादं कुरु सुव्रत॥३८॥ मुनिरुवाच॥ शृणु मे वचनं भद्रे शापानुग्रहकारकं। किं करोमि त्वया पाप

म

Indira Gandhi National
Centre for the Arts

३३ चै॰ ए॰कृ ३

पेक्षयंनीतंमहात्मयः॥३९॥चैत्रस्यकृष्णपक्षेवैभवत्येकादशीतुया॥पापमोचनिकानामसर्वपापक्षयंकरी॥४०॥
तस्याव्रतेकृतेसद्यःपिशाचत्वंप्रयास्यति॥इत्युक्तोतांसमेधावीजगामपितुराश्रमं॥४१॥ तमागतंसमा
लोक्यच्यवनःप्रत्युवाचह॥किमेतद्विहितंपुत्रत्वयापुण्यक्षयंकृतं॥४२॥ मेधाव्युवाच॥पापकर्मकृतं
तातरमिताचाप्सरामया॥प्रायश्चित्तंब्रूहितातयेनपापक्षयोभवेत॥४३॥ च्यवनउवाच॥चैत्रस्यचासि
तेपक्षेनाम्नावैपापमोचनी॥अस्याव्रतेकृतेपुत्रपापराशिःक्षयंव्रजेत॥४४॥इतिश्रुत्वापितुर्वाक्यंकृ
तंतेनव्रतोत्तमं॥गतंपापंक्षयंतस्यपुण्ययुक्तोवभूवसः॥४५॥साप्येवंमंजुघोषाचकृत्वैतद्व्रतमुत्तमं
॥पिशाचत्वविनिर्मुक्तापापमोचनिकाव्रतात॥४६॥दिव्यरूपधरासावैगतानाकेवराप्सरा॥लोमश
उवाच॥ ॥पापमोचनिकांराजनयेकुर्वंतिनरोत्तमाः॥तेषांयस्यात्कंकिंचितचसर्वंक्षयंव्रजेत॥४७॥प
ठनात्श्रवणाद्राजनगोसहस्रफलंलभेत॥ब्रह्महाहेमहारीचसुरापोगुरुतल्पगः॥४८॥व्रतस्यचास्य ए॰ ३

३४ चै॰ ए॰कृ ४

कारणात्पापमुक्ताभवंतिते॥बहुपुण्यप्रदंह्येतत्कारणाद्व्रतमुत्तमं॥४९॥इतिश्रीभविष्योत्तरेचैत्रकृष्ण
पापमोचन्येकादशीमाहात्म्यं॥ ॥समाप्तं॥ ॥शुभमस्तु॥ ॥ ॥ ॥ ॥ ॥

ए॰ ४

Indira Gandhi National Centre for the Arts